# चतुर्थप्रकरणम्

# शुद्धाद्वैतसम्प्रदाये कर्मकाण्डम्

1. शुद्धाद्वैते विविधानि वैदिककर्माणि ।

2. शुद्धाद्वैते विविधोत्सवाः ।

3. शुद्धाद्वैते विविधव्रतानि तद्योद्यापनानि ।

## 1. शुद्धाद्वैते विविधानि वैदिककर्माणि ।

अस्मिन् जगति भारतदेशः आध्यात्मप्रधानो देशः वर्तते। तत्र ऋषिभिः महर्षिभिश्च स्वात्मचिन्तनपरम्पराया आत्मस्वरूपं अनुभूतमृ। आत्मस्वरूपविषये वेदेषु उपनिषत्सु पुराणेषु च समारोहरूपेण च वर्णितम्। वेदेऽपि ब्रह्मणः रूपद्वयं सुस्पष्टम्। तत्र निर्गुणनिराकारब्रह्मणः विषये भगवतगीतादि ग्रन्थेषु नैकानि उदाहरणानि प्रस्तुतानि मनुस्मृतौ एकः श्लोकः प्रसिद्धः वर्तते, यथा –

एततदेशप्रसूतस्य सकाशादग्रजन्मनः।
स्वं–स्वं चरित्रं शिक्षेन् पृथिव्यां सर्वमानवाः।।[1]

इति आधारीकृत्य सकलमानवानां कल्याणायस्मृतीनां कर्मणां विवेचनं गृह्सूत्रेषु, धर्मसूत्रेषु च प्राप्यते।

शंकराचार्यतः वैष्णवाचार्य पर्यन्तं सर्वैः आचार्यैः वेदविहितकर्मणि स्वीकृतानि। तत्र द्विविधं कर्म इति। वैदिकं, स्मार्तं च। अत्र वैदिककर्मणां विवेचनं प्रस्तूयते। वेदेषु अयं उद्घोषः प्राप्यन्ते, यत् मानवानां कल्याणाय कर्मणि कर्तव्यानि।

**वैदिकधर्मस्य स्वरूपम् :–**

वेदप्रतिपादितः धर्मः वैदिकधर्मः। वैदिक धर्मे ईश्वरः, अजरः, अमरः शुद्धः, व्यापकः, सर्वशक्तिमान् जगनियन्ता, सर्वज्ञः न्यायशीलः, शुभाशुभकर्मफलदाता, सृष्टिस्थितिप्रलयकर्ता च तथा चोक्तम् – तमेकं सद्विप्रा बहुधा वदन्ति। ईशावास्यमिदं सर्वं –। स एव ईश्वरः उपास्यः।

**वेदे मोक्षस्यनन्दः –**

वेदे मोक्षानन्दस्वरूपस्य वर्णनं दृश्यते। यत्र ज्योतिरस्रं यस्मिन् लोके स्वर्हितं। तस्मिन् मां धेहि पवमानामृते लोके अक्षित इन्द्रायेन्द्रो परिस्रव इत्यादिः। स खलुमोक्षानन्दः सत्येन, तपसा, श्रद्धया तथा च आध्यात्मिकज्योतिष्टप्रदीप्त्या एवं सम्भवः।

**वेदे राष्ट्रभावना :–**

वेदेऽखिलमेव विश्वं राष्ट्रत्वेन अभिमतं तादृशराष्ट्रस्य राजा तादृशे भेवत्। यं सर्वप्रजाः वाच्छेयुः। उक्तञ्च –

ध्रुवं ते राजावर्णो ध्रुवं देवा वृहस्पतिः।
ध्रुवं त इन्द्रश्चाग्निश्च राष्ट्रं धारयतां ध्रुवम्।।

एतादृशस्य एकच्छत्रवतो राज्ञः राष्ट्रजनकल्याणं भवेदत्र न सन्देहो भवितुमर्हति। एवं विधा नृपः पर्वतः इवाचलः सन् राष्ट्रं संधारयति। तैत्तरीयब्राह्मणे च – विशि राजा प्रतिष्ठितः।[2]
प्रजाायामेव राज्ञः प्रतिष्ठानं भवति।

**वेदेमांसभक्षणनिषेधः –**

वेदे गोमांसमनुष्यमांसाश्वादिमांस –भक्षणस्य निषेध उक्तञ्च–यः –

ये पौरुषैण क्रविषा समक्तो यो अश्वेन पशुना यातुधानः।
ये अन्याये भरति क्षीरमग्ने तेषां शीर्षाणि हरसापि वृश्च।। [3]

पुरुष अश्वादिमांस भक्षयितुं शिरच्छेदो दण्डरूपेण विहितः गोदुग्ध परिहर्तुश्चापि शिरच्छेदो व्यवस्थितः।

**वेदे द्यूतनिषेधः –**

ऋग्वेदस्य दशममण्डले अक्षाख्य–द्यूतक्रीडायाः निदा निधेश्च उपदिष्टः–

अक्षैर्मा दीव्यः कृषिमित कृषस्व वितो रमस्व बहुमन्यमानः।
तत्र गावः कितव तत्र जाया तन्मे वि चष्टे सवितायमर्यः।। [4]

प्रसविता अयमीश्वरः आचष्टे द्यूतं मा कुरु। कृषिमेव कृषस्य तत्सम्पादिते धने रतिं कुरु। इतथं वेदाः धर्मार्थकाममोक्षाणां चतुर्णामेव वर्गाणां साधकाः वेदानां प्रतिपाद्यविषयः सामान्येन कर्म मीमांसा एवं विशेषतस्तु समस्तस्य मानवज्ञानस्य सूत्ररूपेण वर्णनात् एवास्ति न तत्र विस्तृतं शक्यम्। एतावदेव इति त्यवच्देतुम्। तथापि देवतस्तृतिः, कर्मसाधना, ज्ञानमीमांसा चेति

वेदवर्णितेषु प्रमुखेषु विषयेषु समुल्लेखनीयाः विषयाः। विधिनिषेधरूपेणाऽपि ज्ञायते वेदाः।

अध्येतव्याः नित्यं वेदाः। अनुष्ठेयो वेदादितकर्मनिकरः संसेव्या विद्वांसस्तपस्विनः। प्रतिपादनीयामहिंसाव्रतम्। भाषणीयं सत्यमेव नित्यम् प्रदेयं प्रात्रेभ्यो विद्या द्रविणं। चिकित्सतव्यो जरामरणव्याधिः प्रयतनेन। संसेव्यौ पितरौ, प्रतिष्ठापनीयं विश्वबन्धुत्वमृ। सर्वातमना उपलब्ध्व्यः सर्वाि त्रिविधदुःखायान्तविप्रमोक्षः इत्यादिकम्।

एवं प्रकारेण सगुणापासना मध्ये विष्णोः स्वरूपं कृष्णस्य पूजनं वैदिकरीत्या अत्र वल्लभसम्प्रदाये स्वीक्रियते।

कस्मिनन्नपि यज्ञस्य प्रारम्भे अथांग पूजासन्दभे सर्वेषां गनव्रहाणां पूजनं आवाहनं वैकिदरीत्या भवति। अत्र संक्षेपेण वैदिककर्मणां नामानि उद्धृयते –

| क्रमः | वैदिककर्मणाः | क्रमः | वैदिककर्मणाः |
|---|---|---|---|
| 1 | सन्ध्यावन्दनादिकम् | 23 | बालकृष्णप्रतिष्ठा |
| 2 | पञ्चमहाभूतयज्ञ | 24 | अग्निपूजनम् |
| 3 | अग्निहोत्रम् | 25 | कुशकण्डिका |
| 4 | यमुनायागः | 26 | वास्तुपूजनम् |
| 5 | गोवर्धप्राणप्रतिष्ठा | 27 | भद्रमण्डलपूजनम् |
| 6 | अवावरणदेवतापूजनम् | 28 | दशदिक् पालादि पूजनम् |
| 7 | बालकृष्णस्य त्रिंशोपचार पूजनम् | 29 | क्षेत्रपालादिकं पूजनम् |
| 8 | प्रायश्चित्त प्रयोगः | 30 | तुलसीविवाहः |
| 9 | दशविधानम् | 31 | श्रावणप्रयोगः |
| 10 | हेमाद्रि–उक्त स्नानम् | 32 | बलिवैश्वदेवविधः |
| 11 | श्रीमदभागवतपूजनम् | 33 | पुण्यावहवाचनम् |
| 13 | यज्ञोपवीतविधिः | 34 | गणपत्यादिपूजनम् |

| | | | |
|---|---|---|---|
| 13 | विविधनक्षत्रजननशान्तिः | 35 | द्वादशमासस्य उभयापक्षयोः एकादशी विधिः |
| 14 | पुरुषोत्तमयागविधिः | 36 | वामनावतारपूजनम् |
| 15 | स्वमार्गीयस्वरूप स्थापनाविधिः | 37 | देवोत्थापनाभूतम स्नानविधिः |
| 16 | सूर्यचन्द्रग्रहणयोः विधिः | 38 | रामजन्मोत्सवविधिः |
| 17 | कृष्णावतारपूजनम् | 39 | नृसिंहावतार प्रादुरभूतोत्सवविधिः |
| 18 | अधिवासनम् | 40 | षष्ठीपूजनविधिः |
| 19 | वसन्तोत्सवः | 41 | सरस्वतीपूजनविधिः |
| 20 | स्नानयात्राविधिः | 42 | ज्येष्ठ–शुक्लपूर्णिमायां ज्येष्ठाभिषेकः |
| 21 | मार्जनविधिः | 43 | अधिकमासविषया दानादिक्रमः |
| 22 | भगवतः कृष्णस्य विविधेत्सवानां आयोजनम् | 44 | श्रीमदभागवत पुस्तकषोडशोपचार पूजननविधिः |

इत्यादीनां कर्मणां वैदिकदृष्टया पूजनविधिः स्वीक्रियते शुद्धाद्वैत सम्प्रदाये।

## सन्दर्भिका


1. मनु–2 / 20
2. तैत्तरीय
3. ऋ. – 10 / 87 / 16
4. ऋग.–10 / 34 / 13

# 2.शुद्धाद्वैते विविधोत्सवाः

(उत्+सू+अच् ।) नियताल्हादजनकव्यापारः। तत्पर्य्यायः। क्षणः 2 उद्भवः 3.उद्धर्षः, 4.महः, 5.इत्यमरः।[1] (मनु. ) तस्मादेताः सदा पूज्या भूषणाच्छादनाशनैः। भूतिकामैनरैर्नितयं सत्कारेषुत्सवेषु च। उत्सेकः। इच्छाप्रसवः। कोपः[2] इति मेदिनी। उन्नति अभ्युदयः। उत्सवे व्यसेन चैव दुर्भिक्षे राष्ट्रविप्लवे ।।[3]

उत्सवशब्दस्य अर्थः अयमेव भवति। अत्र वैष्णवसम्प्रदाये भगवतः सर्वेषां अवताराणां आल्हाद्पूर्वकं पूजनादिकं कृत्वा आनन्दमनुभूयते भक्तजनैः तदेव उत्सवरूपेण स्वीक्रियते। अस्य पर्यायवाचिनः शब्दः उद्धरसः महः च भवति। यत्र पूज्यानां भगवतां जयनत्यः भवति तासां जयन्तीनां सोल्लासेन समारोहः क्रियते तदेव उत्सवाः भवन्ति। वैष्णवसम्प्रदाये द्वादशमासेसु प्रायेण विष्णुदीनां उत्सवः भवति तदत्र क्रमशः विविच्यते। शुद्धाद्वैतसम्प्रदाये पूर्वाचार्यैः व्रतोत्सवनिर्णयः नामको ग्रन्थः लिखितः। अत्र पंडित श्री गट्टूलालजी कृत उत्सवनिर्णयानुसारेण उत्सवानां विधिः पद्यरूपेण उपस्थाप्यते। अहं अत्र उत्सवनामानि श्लोकबद्धानि स्वविधिं प्रस्तौमि –

1. जन्माष्टम्युत्सवविधि।
2. राधाष्टमी उत्सवविधिः।
3. वामनोत्सवविधिः।
4. आश्वनोत्सवविधिः।
5. धनत्रयोदशी उत्सवविधिः।
6. रूपचतुर्दशी उत्सवविधिः।
7. मार्गोत्सवविधिः।

## जन्माष्टम्युत्सवविधिः –

चिन्तासन्तानहन्तारो यत्पादाम्बुजरेणवः।
स्वीयानां तन्निजाचार्यान्प्रणमामि मुहुर्मुहः।।

यदनुग्रहतो जन्तुः सर्वदुःखातिगो भवेत्।
तमहं सर्वदा वन्दे श्रीमद्वल्लभनन्दनम्।।

आविर्भवद्भविकभागवतार्थरत्नसार्भी–
कृतत्रिदशसर्गनिसर्गयत्नम्।
तापन्नयक्षयकरामलाक्तर›
श्रीवल्लभाद्भुतसुधार्णमाश्रिताः स्म।।

प्रणम्य रम्यापादाब्जे स्वामिनीसयुजो हरेः।
संवत्सरोत्सवविधिर्भभक्तिमार्गं प्रकाश्यते।।

मध्ये सर्वोत्सवानां हि मूलत्वाज्जनमनो हरेः।
न ग्राह्या वैष्णवैः सद्भिरूपोप्या त्वपरेऽहानि।।

चेद्वृद्धिगामिनी शुद्धा पूर्वा ग्राह्याष्टमी तदा।
यदा क्षीण तदोपोप्या नवमीति विनिर्णयः।।

म›लारार्तिकं कृत्वा प्रभोरुपरि मौक्तिकैः।
तत उत्तार्य प्रथमं रात्रिशृ›ारम्बरम्।।

नवनीतमियं बालं नग्नं पीठे निवेश्येत्।
स्थित्वरूपं तु धृत्वा प्राऽमुखं चोत्तरामुखम्।।

धृतकेसररितक्षैमनवधौतोत्तियकम्।
मध्ये मन्दिरमापूर्य हरिद्राशुष्कचूर्णतः।।
चतुष्कं तत्र रजतपित्तलस्थालमध्यगे।
पीठे निवेश्येद्देवं चन्दनस्वस्तिका›ते।।

शोणपीताद्यन्यतमकौशेयपिहिते प्रभुम्।
तिलकालङ्कृतं कृत्वा कुङ्कुमेन तथाक्षतैः।।
ताम्बूलद्वयमावेद्य घण्टानादपुरःसरम्।।

**श्रीराधाष्टमीविधिः —**

राधाष्टम्युत्सवे ग्राह्या पूर्वद्वैष्णवैः सदा।
क्षये त्वगत्या विद्धैव माननोयेति निर्णयः।।

म›लानुपदं नित्योत्सवच्छ्रीयुजो हरेः।
अभ्य›पूर्वकं सर्वं शृङ्गारं भूषणाम्बरैः।।

जन्माष्टम्युत्सवदिनभवभावेदयेन्मुदा।
कुलस्थितिकमुष्णीषं नवं केसरितं पुनः।।

कार्यमित्याहुरत्रैके तेन सम्यक् प्रसाधयेत्।
पृथक्स्वरूपभूतायां स्वामिन्यां संभवे सति।।

तत्सुभाले कुङ्कुमस्य बिन्दुं कृत्वाक्षतार्चितम्।
ताम्बुलयुग्ममावेद्य क्षीरेण स्नापयेच्छ्रियम्।।

ततोऽभ्यज्य कवोष्णेन वारिणा श्रीहरिप्रियाम्।
पुष्पतैलसुगन्धाद्यैः काश्मीरैः सलिलैरपि।।

ततो नवा›वस्त्रेण प्रोञ्छय तामाद्रवाससम्।
नवकेसरितर्स्फूजद्घटीशाट्या प्रसाधयेत्।।

हरितांचलशोणान्तर्वाससा नीविबद्धया।
स्फुरत्सिघटीपुष्पनीलकञ्चुलिकोरसम्।।

विशेषाभरणानीह कण्ठलोलादिकानि च।
तथा व्याघ्रनखं हंसाली च हमेलिकाम्।।

निवेदयेत्तदङ्गेषु पृथङ्कनेपथ्यसम्भवे।
असम्भवे हरेरेव तानि संपरिधापयेत्।।

पश्चाद्गोपीवल्लभे तु सोक्षीरं सितायुतम्।
ततो दध्योदनं सेवमाणिक्यक्षीरभोजनम्।।

तिल्लकूटं पत्रवटं कथितेति विशेषकम्।
अन्यत्सर्वं नित्यवद्धिं पकान्ने पञ्चजीरिका।।

बिन्दुका फेणिकाः श्वेता वटकास्तक्रमसंलुप्ताः।
पूरिकाः शुण्ठिकायुक्ता इतरं नित्यवन्मतम्।।

इत्येवं राजभोगे तु भोज्यमन्नं समर्पयेत्।
ज्ञात्वा समयमुत्सार्य भागमाचामेत्प्रभुम्।।

प्राशयित्वा च ताम्बूलं मुक्तारर्तिमाचरेत्।
श्रीप्रभोरनुतीताभं जन्मकालीनमम्बरम्।।

प्राचार्य तस्य स्वामिन्यां पृथकड्.निराजभाजने।
गोधूमपिष्टरचितं पीतं नीराजनं शुभम्।।

मुष्टिकायुतमाधाय कुर्यात्तिलकमचतम्।
ताम्बूले श्रीफलं युग्ममुद्राद्धार्धं निवेदयेत्।।

आचार्य मुष्टिकाः सर्वाश्चस्त्रः परिसर्वतः।
कुर्यादारार्तिकमपाहरेयुश्च स्त्रियो बलिम्।।

कृत्वानवसरं श्रीमत्कुङ्कुमेन ह्युपेयुषाम्।
सर्वेषां तिलकं कुर्यान्मस्तके स्वस्य सङ्गिनाम्।।
संभोज्य स्वान्प्रसादान्नं नित्यं भुञ्जीत भक्तितः।

**वामनोत्सवविधिः –**

या भाद्रैकादशी शुक्ला यस्यां व्रजपतेः पुरा।
दानलीला गोपिकाभिः श्रीकृष्णस्यौदयिक्यतः।।

कृष्णस्योत्थितरूपस्य गन्धैरभ्यज्य नित्यवत्।
कुर्यादङ्गेषु शृङ्गारं शोणं स्याद् गुह्ष्गोपनम्।।

कच्छिकां हरितां शोणां प्रावारं केसरात्मकम्।
मयूरमुकुटं बालरूपे तु जननाह्निका।।

प्रावारिका केसरितेल्यभऽनन्तरं मतम्।
नित्यवद्भोगरागादि सामग्री तु विशेषतः।।

अथ भाद्रद्वादशीचेच्छुका वामनद्वादशी।
षष्टिघट्यात्मिका साद्या क्षयेऽपि प्रथमा मता।।

नोचेदौदयिकी ग्राह्या श्रवणे तु विशेषतः।
श्रवणं संस्पृशेदेकादशीं च द्वादशीं यदि।।

विष्णुशृङ्.खलयोगोऽयं तत्रोपोषणमुत्सवः।
म›लोत्तरमभ्य› उत्थिते तूत्तरीयकम्।।

धौत्रं कैसारितं कृत्वोष्णीषं शाटीं श्रियामपि।
असंभवे बालके तु प्रावारं शीर्षवेष्टनम्।।

नित्यवद्भोगसेवादि राजभोगसरोत्तम्।
बालं गोवर्द्धनशिलां श्रीशालग्राममेव वा।।

मध्यान्हे स्नापयेत्प्राग्वत्पृथकपञ्चामृतेन हि।

पूर्वाक्तैवं गुणविशेषेणविशिष्टायां शुभतिथौ।।

भगवतः पुरुषोततमस्य वामनप्रादुर्भावोत्सवमहं करिष्य इति संकल्पः। **पीताम्बरैः पुष्पुदाम्ना चन्दनेन समर्चयेत्।**

तत उत्सवभोगो हि दध्योनफलादिना। ताम्बूलद्वयमावेद्य मुक्तार्ति –कमाचरेत् ततः पञ्चामृतं प्राश्वोपसेन्न तु दुष्यति। अशक्तौ तु फलाहारः पारणं चेति केचन्।

**अश्विनोत्सवविधिः – –**

अथाऽऽश्विने शुक्लपक्षे ह्यारभ्य प्रतिदिनम्।
नववर्षसु सामग्रीविशेषो राजभोगके।।

आद्ये पर्वणि चाभ्यङ्ग इतरन्नित्यवन्मतम्।
विजयाख्या या सा सायंव्यापिनी मता।।

श्रवणं च तथाऽऽसायं दशमीयोग ईष्यते।
म›लोत्तरमभ्याङ्गानन्तरं रूप्यमुद्रितम्।।

सितं कञ्चुकमभ्य›ऽपर्येच्छोणघटीवृतम्।
शोणं पट्टमयं गुह्यगोपनं च कटीपटम्।।

तनीयस्तु तदा श्वेतं कुलस्थितिकवेष्टनम्।
शोणस्फुरद्घटीप्राप्तं तादृशीमेव शाटिकाम्।।

बालस्वरूपे च प्रोक्तरूपं कञ्चुकमुत्तमम्।
कुलस्थितिकृदुष्णीपं श्रीमत्वारिकामपि।।

गोपीवल्लभभोगस्तु नित्यवत्कार्यं एव हि।
राजभोगे सेववटा दुग्धापूपा विशेषत :।।

नीराजनं मौक्तिकैः स्याद्भागमुत्थापने सह।
सन्ध्यासामयिकश्चापि ततस्तु विजयोत्सवः।।

रघुनाथस्य चरितं पश्यतां गायतां नृणाम्।
पुरा युवाङ्कुराशीर्षवेष्टने समर्पयेत्।।

चन्द्रिका उद्धास्य घण्टाद्याघोषपूर्वकम्।
प्रथमं तिलकं कृत्वा साक्षतं वीटकार्पणम्।।

मुष्टिका वारयित्वाऽथ प्रभुं नीराजयेन्दमुदा।
माठपक्कान्नदशकं निवेद्य पुरतो हरेः।।

प्रावारयेज्जवनिकां भोगामुत्सारयेत्क्षणात्।
आचम्य मुखं प्रोञ्छय सुगन्धैः संप्रमोदयेत्।।

भूषणानि फटीवस्त्रं समुत्तार्याऽतो हरेः।
निधाय शायनं भोगं ततो नीरजयेत्प्रभुम्।।

कंचुकादि समुत्तार्य शाययेच्च निजं प्रभुम्।
रासलीला पूर्णिमायामाश्विने शरदिः प्रभोः।।

तस्यामभ्यज्य सुतनुशोणं स्याद् गुह्यगोपनम्।
कौशेयं काच्छिकां श्वेतां कलधौता›तन्तुजम्
प्रावारमरुणं शोणकौशेयकसुवेष्टनम्।।

मयूरमुकुटं पीताम्बरभ›ष योजयेत्।
स्वामिन्यां कलधौता›तन्तुजां शाटिकां सिताम्।।

शोणकौशेयान्तरालवसनं नीलकञ्चुकैः।७
बालरूपे तु प्राचारं राजतावयवाम्बरम्।।

बर्हापीडं च शीते तु पीतकौशेयकञ्चकुम्।
श्यामरूपे श्यामपट्टलोचनं गौरकेऽन्यथा।।

नित्यवद्भोगसेवादि शयनारार्तिकातपरम्।
ज्योत्सनोत्सवादनुश्रीमच्छ्रङ्गारपरिवर्तनम्।।
नवश्वेतशिरस्राणसंबद्धं शापयेत्प्रभुम्।
शय्याभोगे पारिवेष्टकापन्नं पायसं सितम्।
वीटकद्वयमावेद्य ह्याचमय्य प्रमोदयेत्।। –20

**धनत्रयोदशीविधिः –**

अथ कार्तिकमासे तु कृष्णे धनत्रयोदशी।

म›लाचार्यानुपदं नवं हरितहैमजम्।।

कञ्चुकं कटिवस्त्रं तु शोणं चीरकवेष्टनम्।
अङ्गेषु योजयेच्छोणंसुतनं गुह्यगोपनम्।।

शाटीं प्रवारिकां शोणां हैमन्तन्तुभवां नवाम्।
श्रीस्वामिन्यां बालके तु प्रवारं चीरकञ्चुकम्।
नित्यवद्भोगरागादि पूर्ववच्चेतिदर्शितम्।।

**रूपचतुर्दशविधिः –**

अथ रूपचतुर्दशी कार्तिके कृष्णपक्षके।
सत्यां चन्द्रोदये काले म›लारार्तिकादनु।।

प्रभोः श्रीतिलकं कृत्वा कुङ्कुमेनाक्षतादिकम्।
ताम्बूलद्वययमावेद्य सीतालोष्टसमायुतम्।।

सकण्टदलैर्युक्तमपामार्गं त्रिरग्रतः।
भ्रामयेद्दीपकान् दत्वा सानुपीठे जलं क्षिपेत्।।

**मार्गोत्सवविधिः –**

अर्थ मार्गशिरे गोप्ये प्रभोर्भोगसुखवहे।
नित्यं पक्वान्नभोगांश्च व्यञ्जनादिविशेषतः।।

शुक्लपक्षे च सप्तम्यां गोकुलेशमहाप्रभोः।
जन्मोत्सवस्तत्र दिनेऽभ्यङ्गः काश्मीरकैः प्रभोः।।

पीतपट्टमयं नव्यं कञ्चुकादिविशेषतः।
श्रीगोपीवल्लभे सेवक्षीरप्रभृतिभिभोजनम्।।

राजभोगे च पक्वान्नं वटकांस्त्क्रमसंप्लुप्तान्।
पिष्टजारार्तिकं चेति नित्यवच्चापरं मतम्।।

स्वकीयगुरुभक्तिगोस्वामिकुलसंभवम्।
अन्येषामपि बालानां जन्मोत्सव इयान्विधिः।।

अत्र केचिच्छुक्लपक्षे श्रीमत्स्यद्वादशीदिने।
व्यञ्जनद्वादशीभोगोत्सवं कुर्वन्ति वैष्णवाः।।

पौर्णमासपूपभोगो केचिद्बलभद्रस्य चोतसवम्।
प्रादुर्भावस्य कुर्वन्ति गोकुलेशाग्रजन्मतः।।
पायसापूपभोगो हि विशेषो नितयवत्परम्।

एवं प्रकारेण उत्सवानां आयेजनं भवति तद् विधिमपि सम्प्रदायोनुसारेण सर्वे भक्तजनाः क्रियन्ते। एतद्रिच्य अन्योत्सवः अपि अस्मिन् सम्प्रदाये प्रचलिताः सन्ति।

# सन्दर्भ–सूची


1. मनुस्मृतिः – 3/59
2. मेदिनी
3. हितोपदेशः।

## 3. शुद्धाद्वैते विविधव्रतानि तद्योद्यापनानि

प्रायेण सर्वे देशेषु तथा च सर्वेषु धर्मेषु च व्रतानां उत्सवादीनां च महत्वपूर्णं स्थानं विद्यते। व्रतशब्दस्य अर्थः भवति – ''व्रियते स्वर्गं व्रजन्ति स्वर्गमनेन वा'' ।[1]

व्रतविषये वेदेषु अपि मन्त्राः प्राप्यन्ते – '' ब्राह्मणाः व्रतचारिणः। [2] अपा वयमादित्पव्रते तव [3] इति। व्रतशब्दस्य अर्थः संयमः क्रियते। वाराहपुराणेऽपि अंहिसा–सत्यं–अस्तेयं–ब्रह्मचर्य इत्यादीनां मानसिकव्रतं स्वीकृतम्। यथा –

कूर्मपुराणे अपि व्रतोपवासैः भगवनाविष्णुः शिवस्य प्राप्तिः भवति इति स्वीक्रियते। अत्र शुद्धाद्वैतसम्प्रदाये कानि–कानि व्रतानि सन्ति इत्यस्य परिचयः मासाधारेण उद्धृयते। विशेषरूपेण गुर्जरप्रदेशे कार्तिकशुक्लपक्षतः संवत्सरस्यारम्भः स्वीक्रियन्ते अपि च सम्पूर्णभारतवर्षे चैत्रशुक्लपक्षतः संवत्सरस्यारम्भो जायते। अनेन कारणेन अत्र चैत्रमासतः प्रारभ्य फाल्गुनमासपर्यन्तं व्रतानां मासाधारेण विवेचनमत्र प्रस्तूयते। यथा – विविधधसम्प्रदायेषु पूजनपद्धति तथा च विविधव्रतानि प्राप्यन्ते तथैव शुद्धाद्वैतसम्प्रदायेऽपि विविधव्रतानि तथा उत्सवादीनां वर्णनं प्राप्यन्ते। तथा –

# शुद्धाद्वैतसम्प्रदाये स्वीकृत व्रतादीनाम् उत्सवानाम् मासाधारेण विवरणम्

| मास | तिथि | पक्ष | व्रतनाम |
|---|---|---|---|
| कार्तिक | 11 | शुक्ल | एकादशी |
| कार्तिक | 30 | शुक्ल | दर्श–अमावस्या |
| मागशर | | कृष्ण | श्रीमदनमोहन पाटोत्सव |
| मागशर | | कृष्ण | मोक्षदा एकादशी |
| मागशर | | कृष्ण | श्रीमद्भगवतगीता जयन्ती |
| मागशर | | कृष्ण | अन्वाधान–गोपमास समाप्त श्रीबलदेवोत्सव |
| मागशर | | शुक्ल | सफला एकादशी |
| मागशर | | शुक्ल | दर्श अमावस्या |
| पौष | | कृष्ण | पुत्रदा एकादशी |
| पौष | | शुक्ल | मकर संक्रान्ति |
| पौष | | शुक्ल | षटतालिका एकादशी |
| पौष | | शुक्ल | दर्श अमावस्या |
| माघ | | कृष्ण | वसंतपंचमी |
| माघ | | कृष्ण | जया एकादशी |
| माघ | | कृष्ण | अन्वाधान |
| माघ | | शुक्ल | श्रीनाथजी पाटोत्सव |
| माघ | | शुक्ल | विजया एकादशी |

| | | | |
|---|---|---|---|
| माघ | | शुक्ल | दर्श–अमावस्या |
| माघ | | शुक्ल | आम्लकी एकादशी |
| माघ | | शुक्ल | होलिकोत्सव |
| फाल्गुन | | कृष्ण | पाटोत्सव |
| फाल्गुन | | कृष्ण | पापमोचनी एकादशी |
| फाल्गुन | | कृष्ण | दर्श–अमावस्या |
| फाल्गुन | | कृष्ण | अन्वाधान |
| चैत्र | | शुक्ल | रामनवमी |
| चैत्र | | शुक्ल | कामदा एकादशी |
| चैत्र | | शुक्ल | चैत्री–पूर्णिमा |
| चैत्र | | कृष्ण | श्री विटठलदास पाटोत्सव |
| चैत्र | | कृष्ण | जगदगुरु वल्लभाचार्य महोत्सव |
| चैत्र | | कृष्ण | वरुथनी एकादशी |
| वैशाख | | शुक्ल | अक्षय तृतीया |
| वैशाख | | शुक्ल | मोहिनी एकादशी |
| वैशाख | | शुक्ल | नृसिंह जयन्ती |
| वैशाख | | शुक्ल | अन्वाधान |
| वैशाख | | कृष्ण | अपरा एकादशी |
| वैशाख | | कृष्ण | अन्वाधान |
| ज्येष्ठ | | शुक्ल | निर्जला एकादशी |
| ज्येष्ठ | | शुक्ल | गंगा दशहरा |
| ज्येष्ठ | | कृष्ण | योगिनी एकादशी |
| ज्येष्ठ | | कृष्ण | दर्श–अमावस्या |
| आषाढ़ | | शुक्ल | द्वारकाधीश–कांकरोली, पाटोत्सव |
| आषाढ़ | | शुक्ल | देवशयनी एकादशी |
| आषाढ़ | | शुक्ल | अन्वाधान |
| आषाढ़ | | कृष्ण | हिंडोला उत्सव |

| | | | |
|---|---|---|---|
| आषाढ़ | | कृष्ण | जन्माष्टमी बधाई, नाथद्वारा |
| आषाढ़ | | कृष्ण | कामिका एकादशी |
| आषाढ़ | | कृष्ण | दर्श–अमावस्या |
| आषाढ़ | | कृष्ण | अन्वाधान |
| श्रावण | | शुक्ल | श्रीगोविन्दलाल जी उत्सव |
| श्रावण | | शुक्ल | श्री कल्याणराय जी पाटोत्सव |
| श्रावण | | शुक्ल | पुत्रदा एकादशी |
| श्रावण | | शुक्ल | रक्षा–बन्धन |
| श्रावण | | कृष्ण | जन्माष्टमी |
| श्रावण | | कृष्ण | श्रीनन्द जन्मोत्सव |
| भाद्रपद | | शुक्ल | राधाष्टमी |
| भाद्रपद | | शुक्ल | एकादशी |
| भाद्रपद | | शुक्ल | अन्वाधान |
| भाद्रपद | | कृष्ण | श्री हरिराय महाप्रभु उत्सव |
| भाद्रपद | | कृष्ण | श्रीमहाप्रभु जी ज्येष्ठलाल श्री गोपीनाथ जी प्रादुर्भाव महोत्सव |

एवं प्रकारेण द्वादशमासेषु यानि–यानि व्रतानि निर्दिष्टानि तेषु व्रतेषु केषांञ्चित व्रतानां उद्यापनमपि भवति।

**उद्यापनम् –**

उद्यति पालयति यः सः उद्याापनम् इति अर्थात् यस्य व्रतस्य पालनं क्रियते तस्य यथाविधि शास्त्रानुसारेण यदा समाप्तः क्रियते समाप्तौ यः विधिः, पूजन–हवनस्य वर्तते तदेव उद्यापनं भवन्ति। यथा –

एकादशीव्रतस्य उद्यापनम् अपि च अन्यस्य व्रतादीनां विविधः वर्तते। इदमेव विविधव्रतानां विवेचनं उद्वापनं च भवति।

---

## सन्दर्भ–सूची


1. व्रतपरिचयः – भूमिका, गीताप्रेस, गोरखपुर
2. ऋ.संहिता– 5/7/7/3/1
3. ऋ.सहिता – 1/2/15/5